# સદાશિવ મહેન્દ્ર સ્તુતિઃ

## Sadashiva Mahendra Stutih

---

સદાશિવમહેન્દ્રસ્તુતિઃ ।

પરતત્ત્વલીનમનસે પ્રણમદ્ભવબન્ધમોચનાયાશુ ।
પ્રકટિતપરતત્ત્વાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૧॥

પરમશિવેન્દ્રકરામ્બુજસંભૂતાય પ્રણમ્રવરદાય ।
પદધૂતપઙ્કજાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૨॥

વિજનનદીકુઞ્જગૃહે મઞ્જુળપુલિનૈકમઞ્જુતરતલ્પે ।
શયનં કુર્વાણાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૩॥

કામાહિદ્વિજપતયે શમદમમુખદિવ્યરત્નવારિધયે ।
શમનાય મોહવિતતેઃ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૪॥

નમદાત્મબોધદાત્રે રમતે પરમાત્મતત્ત્વસૌધાગ્રે ।
સમબુદ્ધયેઽશ્મહેમ્નોઃ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૫॥

ગિલિતાવિદ્યાહાલાહલહતપુર્યષ્ટકાય બોધેન ।
મોહાન્ધકારરવયે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૬॥

શમમુખષટ્કમુમુક્ષાવિવેકવૈરાગ્યદાનનિરતાય ।
તરસા નતજનતતયે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૭॥

સિદ્ધાન્તકલ્પવલ્લીમુખકૃતિકર્ત્રે કપાલિભક્તિકૃતે ।
કરતલમુક્તિફલાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૮॥

તૃણપઙ્કલિપ્તવપુષે તૃણતોઽપ્યધરં જગદ્વિલોકયતે ।
વનમધ્યવિહરણાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૯॥

નિગૃહીતહૃદયહરયે પ્રગૃહીતાત્મસ્વરૂપરત્નાય ।
પ્રણતાબ્ધિપૂર્ણશશિને પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૧૦॥

અજ્ઞાનતિમિરરવયે પ્રજ્ઞાનાંભોધિપૂર્ણચન્દ્રાય ।
પ્રણતાઘવિપિનશુચયે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥૧૧॥

મતિમલમોચનદક્ષપ્રત્યગ્બ્રહ્મૈક્યદાનનિરતાય ।

સ્મૃતિમાત્રતુષ્ટમનસે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૨||

નિજગુરુપરમશિવેન્દ્રશ્લાઘિતવિજ્ઞાન કાષ્ઠાય |
નિજતત્ત્વનિશ્ચલહૃદે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૩||

પ્રવિલાપ્ય જગદશેષં પરિશિષ્ટખણ્ડવસ્તુનિરતાય |
આસ્યપ્રાપ્તાન્નભુજે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૪||

ઉપધાનીકૃતબાહુઃ પરિરબ્ધવિરક્તિરામો યઃ |
વસનીકૃતખાયાસ્મૈ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૫||

સકલાગમાન્તસારપ્રકટનદક્ષાય નમ્રપક્ષાય |
સચ્ચિત્સુખરૂપાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૬||

દ્રાક્ષાશિક્ષણચતુરવ્યાહારાય પ્રભૂતકરુણાય |
વીક્ષાપાવિતજગતે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૭||

યોઽનુત્પન્નવિકારો બાહૌ મ્લેચ્છેન છિન્નપતિતેઽપિ |
અવિદિતમમતાયાસ્મૈ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૮||

ન્યપતન્સુમાનિ મૂર્ધનિ યેનોચ્ચરિતેષુ નામસૂગ્રસ્ય |
તસ્મૈ સિદ્ધવરાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૧૯||

યઃ પાપોનોઽપિ લોકાન તરસા પ્રકરોતિ પુણ્યઃ નિષ્ઠાગ્ર્યાન |
કરુણામ્બુરાશયેઽસ્મૈ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૦||

સિદ્ધેશ્વરાય બુદ્ધેઃ શુદ્ધિપ્રદપાદપદ્મનમનાય |
બદ્ધે પ્રમોચકાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૧||

હૃદ્યાય લોકવિતતેઃ પદ્યાવલિદાય જન્મમૂકેભ્યઃ |
પ્રણતેભ્યઃ પદયુગળે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય || ૨૨||

જિહ્વોપસ્થરતાનપ્યાહ્નોચ્ચારેણ જાતુ નૈજસ્ય |
કુર્વાણાય વિરક્તાન્પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૩||

કમનીયકવનકર્ત્રે શમનીયભયાપહારચતુરાય |
તપનીયસદ્રુશવપુષે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૪||

તારકવિદ્યાદાત્રે તારકપતિગર્વવારકાસ્યાય |
તારજપપ્રવણાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૫||

મૂકોઽપિ યત્કૃપા ચેલ્લોકોત્તરકીર્તિરાશુ જાયેત |
અદ્ભુતચરિતાયાસ્મૈ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૬||

દુર્જનદૂરાય તરાં સજ્જનસુલભાય હસ્તપાત્રાય |
તરુતલનિકેતનાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૭||

ભવસિન્ધુધારયિત્રે ભવભક્તાય પ્રણમ્રવશ્યાય |
ભવબન્ધવિરહિતાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૮||

ત્રિવિધસ્યાપિ ત્યાગં વપુષઃ કર્તું સ્થલત્રયે ય ઇવ |
અકરોત્સમાધિમસ્મૈ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૨૯||

કામિનમપિ જિતહૃદયં ક્રૂરં શાન્તં જડં સુધિયમ |
કુરુતે યત્કરુણાઽસ્મૈ પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય || ૩૦||

વેદસ્મૃતિસ્થવિદ્વલ્લક્ષણલક્ષ્યેષુ સન્દિહાનાનામ |
નિશ્ચયકૃતે વિહર્ત્રે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૩૧||

બાલારુણનિભવપુષે લીલાનિર્ધૂતકામગર્વાય |
લોલાય ચિતિપરસ્યાં પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૩૨||

શરણીકૃતાય સુગુણૈર્ણીકૃતરક્તપઙ્કજાતાય |
ધરણીસદૃક્ક્ષમાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૩૩||

પ્રણતાય યતિવરેણ્યૈર્ગણનાથેનાપ્યસાધ્યવિધ્નહતે |
ગુણદાસીકૃતજગતે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૩૪||

સહમાનાય સહસ્રાણ્યપ્યપરાધાન્પ્રણમ્રજનરચિતાન |
સહસૈવ મોક્ષદાત્રે પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૩૫||

ધૃતદેહાય નતાવલિતૂણપ્રજ્ઞાપ્રદાનવાઞ્છાતઃ |
શ્રીદક્ષિણવક્ત્રાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ||૩૬||

તાપત્રયાર્તહૃદયસ્તાપત્રયહારદક્ષનમનમહમ |
ગુરુવરબોધિતમહિમન શરણં યાસ્યે તવાઙ્ઘ્રિકમલયુગમ || ૩૭||

સદાત્મનિ વિલીનહૃત્સકલવેદશાસ્ત્રાર્થવિત સરિત્તટવિહારકૃત સકલલોકહૃત્તાપહૃત |
સદાશિવપદામ્બુજપ્રણતલોકલભ્ય પ્રભો સદાશિવયતીટ સદા મયિ કૃપામપારાં કુરુ ||૩૮||

પુરા યવનકર્તનસ્રવદમન્દરક્તોઽપિ યઃ પુનઃ પદસરોરુહપ્રણતમેનમેનોવિધિમ |
કૃપાપરવશઃ પદં પતનવર્જિતં પ્રાપ યત્સદાશિવયતીટ સ મય્યનવધિં  કૃપાં સિઞ્ચતુ ||૩૯||

હૃષીકહતચેતસિ પ્રહૃતદેહકે રોગકૈરનેકવૃજિનાલયે શમદમાદિગન્ધોજ્ઝિતે |
તવાઙ્ઘ્રિપતિતે યતૌ યતિપતે મહાયોગિરાટ સદાશિવ કૃપાં મયિ પ્રકુરુ હેતુશૂન્યાં દ્રુતમ ||૪૦||

ન ચાહમતિચાતુરીરચિતશબ્દસઙ્ઘૈઃ સ્તુતિં વિધાતુમપિ ચ ક્ષમો ન ચ જપાદિકેઽપ્યસ્તિ મે |
બલં બલવતાં વર પ્રકુરુ હેતુશૂન્યાં વિભો સદાશિવ કૃપાં મયિ પ્રવર યોગિનાં સત્વરમ ||૪૧||

શબ્દાર્થવિજ્ઞાનયુતા હિ લોકે વસન્તિ લોકા બહવઃ પ્રકામમ |
નિષ્ઠાયુતા ન શ્રુતદ્રુષ્ટપૂર્વા બિના ભવન્તં યતિરાજ નૂનમ ||૪૨||

સ્તોકાર્ચનપ્રીતહૃદમ્બુજાય પાદાબ્જચૂડાપરરૂપધર્ત્રે |
શોકાપહર્ત્રે તરસા નતાનાં પાકાય પુણ્યસ્ય નમો વતીશ ||૪૩||

નાહં હૃષીકાણિ વિજેતુમીશો નાહં સપર્યાભજનાદિ કર્તુમ |
નિસર્ગયા ત્વં દયયૈવ પાહિ સદાશિવેમં કરુણાપયોધે ||૪૪||

કૃતયાઽનયાનતાવલિકોટિગતેનાતિમન્દબોધેન |
મુદમેહિ નિત્યતૃપ્તપ્રવર સ્તુત્યા સદાશિવાયાશુ ||૪૫||

ઇતિ શ્રીમજ્જગદ્ગુરુશૃઙ્ગગિરિ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહભારતીસ્વામિભિર્વિરચિતા સદાશિવમહેન્દ્રસ્તુતિઃ સમાપ્તા ||

**www.shaivam.org**